**पौष्ण** त्रि० पूषा देवताऽस्य तस्येदं वा अण् षणन्तत्वात् उपधालोपः। १पूषदेवताके चर्वादौ २रेवतीनक्षत्रे न० ३पूषसम्बन्धिनि त्रि० स्त्रियां ङीप्।

**पौष्प** न० पुष्पेण निर्वृत्तः तस्येदं वा अण्। १पुष्पसाध्ये २मद्यभेदे स्त्री। ३कुसुमसम्बन्धिमात्रे त्रि० स्त्रियां ङीप्। ४पाटलिपुत्रनगर्यां स्त्री ङीप् शब्दरत्ना०।

**पौष्य** पु०करवीरपुराधिपे पूष्णः पुत्रे १नृपभेदे तत्कथा "पुष्णः पुत्रोऽभवत् पौष्यः सर्वशास्त्रार्थपारगः" कालिकापु०। उतङ्केनर्षिणा गुरुदक्षिणार्थं याचिते तस्मै कुण्डलदातरि २नृपभेदे भा०आ०६अ०। तदधिकृत्य कृतो ग्रन्थः अण्। भा० आ० पर्वान्तर्गते ३पर्वभेदे न०।

**प्याट्** अव्य० प्याय—बा० डाटि। सम्बोधने अमरः।

**प्याय** वृद्धौ भ्वा०आ०अक०सेट्। प्यायते, अप्यायि—अप्यायिष्ट इदित् ओदिच्च पीनः।

**प्यायस्थूण** पु० गोत्रप्रवरर्षिभेदे।

**प्युक्ष** न० अपि—उक्ष—बा० नक् अपेरल्लोपः। १स्नायुनि २अजमरसर्पे कर्मणि च कात्या०श्रौ० १५।२।२१ कर्कः।

**प्युष** उत्सर्गे चु०उभ०सक०सेट्। प्योषयति ते। अपुप्युषत् त

**प्युष** विभागे दाहे च दि० पर० सक० सेट्। प्युष्यते इरित् अप्युषत् अप्योषीत् पुप्योष। [अप्योषीत् पुप्योष।

**प्युस** विभागे दिवा०पर०सक०सेट्। प्युस्यते इरित् अप्युसत्

**प्यै** वृद्धौ भ्वा०आ०अक०अनिट्। प्यायते अप्यास्त।

**प्र** अव्य०प्रथ—ड। १आरम्भे २गतौ ३उत्कर्षे ४प्राथम्ये ५सर्वतोभावे ६उत्पत्तौ, ७ख्यातौ दव्यवहारे च पुरुषोत्तमः। अस्य क्रियायोगे उपसर्गत्वम्। गतित्वञ्च। अस्यार्थभेदोदाहरणानि गणरत्नटी० उक्तानि यथा

"प्र आदिकर्मदीर्घशब्दशक्त्यवतृप्तिवियोगशुद्धिशक्तीच्छाशान्तिपूजाग्रदर्शनेषु" प्रयातः। प्रवालसूषिकः प्रभुर्देशस्य। प्रवदन्ति दायादाः। हिमवतो गङ्गा प्रभवति। प्रभुक्तमन्नम्। प्रोषितः। प्रसन्नं जलम्। प्रशक्तः। प्रार्थयते। प्रशान्तोऽग्निः। प्राञ्जलिः। प्रबालम्। प्रलोकयति"।

**प्रउग** न० प्राग्युगम् पृषो०। १प्राग्वर्त्तिनि युगे ईषान्तरे कात्या० ७।६।५। कर्कः। तत्र चीयमानस्याग्नेः प्रउगचित्संज्ञा कात्या० १६।५।६। २शस्त्रविशेषे प्रउगमुक्थ्यमव्यथायै"यजु०१५।११। "प्रउगं शंसति निष्केवल्यं शंसति" श्रा०स०भाष्यधृता श्रुतिः"प्रउगनिष्केवल्यशब्दौ शस्त्रविशेषनामनी"इत्युक्त्वा "अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रमिति आख्ये शस्त्रशब्दार्थमाह भाष्यकृत्।

**प्रकङ्कत** पु० १प्रकृष्टविषे २प्रकृष्टगमने सर्पभेदे ऋ० १।१६१।७।

**प्रकट** त्रि० प्र+कट—अच्। स्पष्टे।

**प्रकटित** त्रि० प्र+कट—क्त। प्रकाशिते हेमच०।

**प्रकण्व** पु० प्रकृष्टाः कण्वा यत्र। ऋषिभिन्नत्वात् न सुट्। देशभेदे सि०कौ०। ऋषौ तु सुट् प्रस्कण्व इत्येव।

**प्रकम्पन** पु० प्र+कपि—णिच्—युच्। १वायौ "प्रकम्पनेनानु चकम्पिरे सुराः" माघः। २नरकभेदे च शब्दरत्ना०। ३प्रकम्पनकारके त्रि०।

**प्रकर** पु० प्र+कृ—भावे अप्। १समूहे २अतिक्षेपे च। कर्मणि अप्। ३प्रकीर्णे पुष्पादौ त्रि०। ४अगुरुचन्दने न० मेदि०

**प्रकरण** न० प्र+कृ—ल्युट्। १प्रस्तावे २अभिनेयनायकादिके दृश्यकाव्यभेदे हेमच०। ३ग्रन्थसन्धौ ४एकार्थप्रतिपादकग्रन्थांशे च त्रिका०। नाटकादिनी दश दृश्यकाव्यरूपकाणि विभज्य सा०द० तल्लक्षणमुक्तं यथा

"भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्। शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथ वा वणिक्। सापाय धर्मकामार्थपरो धीरप्रशान्तकः"। विप्रनायकं यथा मृच्छकटिकम्। अमात्यनायकं मालतीमाधवम्। वणिङ्नायकं पुष्पभूषितम्। "नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्। तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः। कितवद्यूतकारादिविटचेटकसङ्कुलः"। कुलस्त्री पुष्पभूषिते। वेश्या तरङ्गदत्ते द्वे अपि मृच्छकटिके। अस्य नाटकप्रकृतित्वात् शेषं नाटकवत्"। कर्त्तव्यस्य इतिकर्त्तव्यताकाङ्क्षस्य वचनं प्रकरणम् इति शवरभाष्योक्ते५ऽर्थे च "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां पारदौर्बल्यमर्थविप्रकर्षात्" जै० ३।३।१४५। तत्र विनियोगसाधने तस्य श्रुतिलिङ्गवाक्यबाध्यत्वं स्थानसमाख्यायोर्बाधकत्वञ्च स्थितम्"। "श्रुतिर्द्वितीया क्षमता च लिङ्गं वाक्यं पदान्येव तु संहतानि। सा प्रक्रिया या कथमित्यपेक्षा स्थानं क्रमो योगबलं समाख्या" पार्थसारथिमिश्रः। शास्त्रसिद्धान्तप्रतिपादके ६ग्रन्थभेदे "अस्य च च वेदान्तप्रकरणत्वात्" वेदान्तसा०।

**प्रकरणसम** पु०गौतमोक्ते सत्प्रतिपक्षापरपर्य्याये १हेत्वाभासभेदे "यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः प्रकरणसमः" गौ०सू०। "क्रमप्राप्तं प्रकरणसमं लक्षयति। स हेतुः स्वसाध्यस्य परसाध्याभावस्य वा निर्णयार्थमपदिष्टः प्रयुक्तः प्रकरणसम उच्यते स क इत्याकाङ्क्षायामाह यस्मात् प्रकरणचिन्तेति करणं "पक्षप्रतिपक्षाविति" भाष्यं